# सङ्कलनात्मकमूल्याङ्कनम्–II, 2017

## संस्कृतम्

अवधि : होरात्रयम् | कक्षा – अष्टमी | पूर्णा ाः – शतम्

**Date – 20.2.2017 (Monday)**

Name of the student ______________________________________________ Section _____

**निर्देषाः –** * सर्वे प्रश्नाः अनिवार्याः ।

* प्रश्नपत्र चतुर्भागेषु विभक्तमस्ति, अतः भागानाम् उल्लेखः करणीयः ।

* प्रत्येक भागस्य प्रश्नानामुत्तराणि क्रमेणैव लेखनीयानि ।

## खण्डः 'क' (अपठितावबोधनम् –10 अंकाः)

**प्र.1 अधोलिखितम् गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत –**

दीपावली प्राचीनतमं पर्वम् । अस्मिन् दिने सर्वाधिकम् आकर्षकं मनोर जनं भवति स्फोटकानाम् आस्फोटनम् । विचित्राणि वर्णयुक्तानि स्फोटकानि आकाशे भूमौ च विविधरूपाणि दर्शयन्ति । जनाः तानि दृष्ट्वा तुष्यन्ति । परन्तु अति सर्वत्र वर्जयेत् । रात्रौ आस्फोटकानां शब्दः कर्णौ बधिरी करोति वायुमण्डलं च दूषयति । पूर्वं तु जनसंख्या सीमिता आसीत् । वृक्षाः वायुं शुद्धं कुर्वन्ति स्म । इदानीं जनसंख्या प्रवृद्धा, वृक्षसंख्या क्षीणा । विस्फोटकेभ्यः निर्गतः धूमः रुग्णान् पीडयति, नवजातशिशुभ्यः हानिकरः सिध्यति । दीपावली–समये शरदि आकाशः निर्मलः भवति । सर्वत्र पवित्रता विराजते । अतः वयम् आनन्देन दीपावलीं मानयेम, वसुन्धरां भूषितां कुर्याम न तु दूषिताम् । सर्वेषां जीवनं सुखमयं भवेत् । किं तेन उत्सवेन यः कस्मैचित् अपि कष्टकरः भवेत् । 'मा कश्चित् दुःखभाग भवेत्' इति अस्माकम् आदर्शः ।

**I. एकपदेन उत्तरत –** **(½×4=2)**

क) केषाम् आस्फोटनं सर्वेभ्यः आकर्षकं मनोर जकं च? (स्फोटकानाम् / विस्फोटकानाम्)

ख) दीपावली कस्यां ऋतौ भवति ? (शरदऋतौ / वसन्तऋतौ)

ग) वायुं के शुद्धं कुर्वन्ति ? (वृक्षाः / आस्फोटकाः)

घ) सर्वेषाम् जीवनं कीदृशं भवेत् ? (दुःखमयम् / सुखमयम्)

**II. पूर्णवाक्येन उत्तरत –** **(2×2=4)**

क) अस्माकं कः आदर्शः ?

ख) स्फोटकानां धूमः कान् पीडयति ?

**III. अनुच्छेदस्य समुचितं शीर्षकं लिखत ।** **(2×1=2)**

**IV. यथानिर्देशमुत्तरत –** **(1×2=2)**

क) गद्यांशात् एकम् 'अव्ययं' पदं चित्वा लिखत ।

ख) 'लाभकरः' इत्यस्य 'विपर्ययम्' पदं चित्वा लिखत ।

## खण्डः 'ख' (रचनात्मककार्यम् – 20 अंकाः)

**प्र.2** भवान् अंकितः । भवता अष्टमीकक्षा उत्तीर्णा । इदानीं नवम् कक्षायां प्रवेशं पातुं प्रधानाचार्यां प्रति लिखितं पत्रं पूरयत । **(½×10=5)**

म  जूषा – 

| |
|---|
| भवताम्, गृहे, गृहीत्वा, प्रधानाचार्यामहोदया, अंकितः, दूरे, मम, प्रवेष्टुम्, दत्वा, निवेदनम् |

सेवायाम्,
माननीया (1)..............
ओ.पी. जिंदलविद्यालयः
रायगढ़ नगरम्

श्रीमति,

सविनयम् (2)........... इदं यत् अहम् अष्टमकक्षायाम् 90ः अंकान् (3)........... उत्तीर्णः जातः । ह्यः एव वयम् द्वारका इत्यस्मिन् नगरे स्वनिर्मिते (4)........... प्रवेशम् कृतवन्तः । मम पूर्वविद्यालयः इतः एकविंशतिक्रोश–पर्यन्तं (5)........... अस्ति । अहम् भवताम् विद्यालये (6)........... इच्छामि । भवतः विद्यालयस्य एकम् बसयानम् अपि (7)........... गृहसमीपे एव आगच्छति । अनेके बालाः द्वारकातः (8)........... विद्यालये गच्छन्ति पठन्ति च । कृपया मह्यम् अपि स्वीकृतिम् (9)........... भवन्तः अनुगृहणन्तु ।

सधन्यवादम् ।
भवतः आज्ञाकारी शिष्यः
(10)...........

**प्र.3** अधोलिखितं चित्रं प  चसंस्कृतवाक्येषु मंजूषायाः पदानां सहायतया वर्णयत – **(2×5=10)**

म  जूषा –

| |
|---|
| म  चे, छात्रा, नृत्यति, एका, दर्शकाः, सितारम्, अतिथयः, वार्षिकोत्सवः, तिष्ठन्ति, वादयति |



**प्र.4** अधोलिखितं वार्तालापं म  जूषातः पदं चित्वा पूरयत – **(1×2=5)**

| |
|---|
| मह्यम्, मिष्टान्नानि, दीपावली, रोचन्ते, नवीनानि |

राकेशः – हे अम्बे ! अद्य त्वम् दीपान् प्रज्वालयसि । अहम् जाने अद्य तु (1)..........इति अस्ति ।

सावित्री – पुत्र ! सत्यम् कथयसि । आगच्छ प्रदर्शय स्व (2)............... वस्त्राणि, एतानि तु शोभन्ते ।

राकेशः – तव नवीना शाटिका अपि (3)............. रोचते । परम् मह्यम् तु मिष्ठान्नानि अपि (4)............... ।

सावित्री – रात्रौ यदा वयम् लक्ष्मीं पूजयामः तदा वयम् (5)............ अपि खादामः । इदानीम् मिष्ठान्नानि वितरणाय गच्छावः ।

## खण्डः 'ग' (अनुप्रयुक्तव्याकरणम् – 20 अंकाः)

**प्र.5** **निम्नलिखितेषु वाक्येषु रेखांकितपदानां समासं विग्रहं वा कोष्ठकात् चित्वा लिखत–** **(1×4=4)**

क) सः <u>कन्दमूलफलानि</u> खादति स्म ।
(कन्दमूलफलम् च / कन्दं च मूलं च फलम् च)

ख) <u>दश आननानि यस्य सः</u> एकः राक्षसः आसीत् ।
(दशाननः / दशानना)

ग) <u>माता च पिता च</u> पूजायोग्यौ भवतः ।
(पीतरः / पितरौ)

घ) अर्जुनस्य सारथिः <u>पीताम्बरः</u> आसीत् ।
(पीतानि अम्बराणि यस्य सः / पीता अम्बर यः सः)

**प्र.6** **अधोलिखितेषु वाक्येषु रेखांकितपदानां प्रकृति–प्रत्ययौ पृथक् कृत्वा लिखत ।** **(1×4=4)**

क) <u>बुद्धिमान्</u> सर्वत्र आदरं लभते । (बुद्धि + मतुप् / बुद्धि + क्त्वा)

ख) पर्वतस्य <u>रमणीयता</u> अवर्णनीया अस्ति । (रमण + ईयत् / रमणीय / तल्)

ग) रमा <u>चतुरा</u> बालिका अस्ति । (चतुर् + ङीप् / चतुर / टाप्)

घ) एतत् तु <u>ऐतिहासिकम्</u> भवनम् प्रतीयते । (इतिहास + ठक् / ऐतिहास + ठाक)

**प्र.7** **अधोलिखितेषु वाक्येषु वाच्यानुसारम् रिक्तस्थानानि पूरयत –** **(1×4=4)**

क) बालः चन्द्रमसम् ............. । (पश्यति / पश्यन्ति)

ख) ............. शिशुः दृश्यते । (मात्रा / माता)

ग) लतया ............. खाद्यते । (भजनम् / भोजनम्)

घ) सः पुस्तकानि ............. । (पठ्यते / पठति)

**प्र.8** **अधोलिखितेषु वाक्येषु कोष्ठकात् उचितं पदं चित्वा रिक्तस्थानानि पूरयत –** **(1×4=4)**

क) ................. परितः बालाः क्रीडन्ति । (वृक्षस्य / वृक्षम्)

ख) अश्ववारः ................. अपतत् । (अश्वात् / अश्वेन)

ग) एकः ................. मूषकम् आनयति । (मुनिः / मुनौ)

घ) ................. नमः । (श्रीकृष्णाय / श्रीकृष्णेन)

**प्र.9** **अधोलिखितेषु वाक्येषु अंकानां स्थाने कोष्ठकात् उचितं समयं चित्वा लिखत –** **(1×4=4)**

क) श्यामा 6:30 उत्तिष्ठति । (सपादषड्वादने / सार्धषड्वादने)

ख) सा 7:45 वादने प्रातराशं करोति । (पादोनअष्ट / सपादअष्ट)

ग) सा 9:15 वादने विद्यालयं गच्छति । (पादोननव / सपादनव)

घ) सा 4:00 वादने गृहं आगच्छति । (चतुर् / सपादचतुर्)

## खण्डः 'घ' (पठितावबोधनम् –50 अंकाः)

प्र. 10 अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत –

सावित्री सामाजिक – कुरीतीनां मुखरं विरोधम् अकरोत् । विधवानां शिरोमुण्डनस्य निराकरणाय सा साक्षात् नापितैः मिलिता । फलतः केचन नापिताः अस्यां रूढौ सहभागिताम् अत्यजन् । एकदा सावित्र्या मार्गे दृष्टं यत् कूपं निकषा शीर्णवस्त्रावृताः तथाकथिताः निम्नजातीयाः काश्चित् नार्यः जलं पातुं याचन्ते स्म । उच्चवर्गीयाः उपहासं कुर्वन्तः कूपात् जलोद्धरणम् अवारयन् । सावित्री एतत् अपमानं सोढुं नाशक्नोत् । सा ताः स्त्रियः निजगृहं नीतवती । तडागं दर्शयित्वा अकथयत् च यत् यथेष्टं जलं नयत । सार्वजनिकोऽयं तडागः । अस्मात् जलग्रहणे नास्ति जातिबन्धनम् । तया मनुष्याणां समानतायाः स्वतंत्रतायाश्च पक्षः सर्वदा सर्वथा समर्थितः ।

**I.** एकपदेन उत्तरत – **(1×2=2)**

क) कासां शिरोमुण्डनस्य सा विरोधम् अकरोत् ?(विधवानाम् / कुरीतीनाम्)

ख) शीर्णवस्त्रावृताः नार्यः किम् याचन्ते स्म ? (जलम् / भोजनम्)

**II.** पूर्णवाक्येन उत्तरत – **(2×2=4)**

क) सावित्री ताः स्त्रियः कुत्र अनयत् ?

ख) उच्चवर्गीयाः स्त्रियः किम् अकुर्वन् ?

**III.** निर्देशानुसारम् उत्तरत – **(1×4=4)**

क) 'सावित्री मुखरं विरोधम् अकरोत् ।' अत्र क्रियापदं किम् ? (अकरोत् / सावित्री)

ख) 'ताः स्त्रियः' अत्र विशेषणपदं किम् ? (ताः / किम्)

ग) 'गतिविधिषु' अत्र का विभक्तिः ? (सप्तमी / चतुर्थी)

घ) 'सावित्री अपमानं सोढुं नाशक्नोत् ।' अत्र कर्तृपदं लिखत । (अपमान / सावित्री)

प्र.11 अधोलिखितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत – **(2×5=10)**

क) हिमालयः भारतस्य कस्यां दिशि वर्तते ? (उत्तरस्यां / पूर्वायाम्)

ख) कस्य राज्यस्य भागेषु गजधरः शब्दः प्रयुज्यते ? (गुजरातस्य / राजस्थानस्य)

ग) गज परिमाणं कः धारयति ? (गजधरः / शिक्षकः)

घ) मृत्तिकायां किं वस्तु न कदापि विनश्यति ? (काष्ठम् / प्लास्टिकम्)

ङ) कुमारसम्भवमहाकाव्यस्य रचयिता कः ? (कालिदासः / तुलसीदासः)

प्र.12 अधोलिखितवाक्येषु रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – (1×5=5)

क) कार्यसमाप्तौ वेतनानि अतिरिच्य सम्मानमपि प्राप्नुवन्ति ।

ख) सुरक्षाप्रबन्धनस्य दायित्वं गजधराः निभालयन्ति स्म ।

ग) पृथिव्याः मानदण्डः हिमालयः अस्ति ।

घ) कुमारसम्भवमहाकाव्यं कालिदासेन विरचितम् ।

ङ) अस्मिन् पाठे कविः हिमालयस्य वर्णनं करोति ।

प्र. 13 अधोलिखितानां पदानां विभक्तिं वचनं च लिखत – (1×5=5)

| | पदम् | विभक्तिः | वचनम् |
|---|---|---|---|
| क) | शक्रस्य | ........... | ........... |
| ख) | कस्तूरी | ........... | ........... |
| ग) | अपरः | ........... | ........... |
| घ) | पृथिवी | ........... | ........... |
| ङ) | छायापातेन | ........... | ........... |

प्र. 14 अधोलिखितानां पदानां विलोमपदं म जूषातः चित्वा लिखत – (1×5=5)

म जूषा – अधः, सार्वजनिकम्, समता, आरोहः, स्वकीयम्

क) परकीयम् ................

ख) विषमता ................

ग) उपरि ................

घ) व्यक्तिगतम् ................

ङ) अवरोहः ................

प्र. 15 अधोलिखितानां यथापेक्षितं संन्धिम् / विच्छेदं कुरुत – (1×5=5)

क) अद्य + अपि .............

ख) सहसैव ............. + .............

ग) स्मरण + अर्थम् .............

घ) नगाधिराजः ............. + .............

ङ) पूर्व + अपरौ .............

प्र. 16 अधोलिखितेषु वाक्येषु रिक्तस्थानानि म  जूषातः समुचितानि पदानि चित्वा पूरयत – (1×5=5)

म  जूषा – चला, गृहीत्वा, पृथिवी, जिज्ञासा, निवसन्ति

क) ............. स्वकीये अक्षे घूर्णति ।

ख) सूर्य अचलः पृथिवी च ............. ।

ग) अत्र बहवः जनजातीयाः ............. ।

घ) मम मनसि एका ............. वर्तते ।

ङ) छात्राः पुस्तकानि ............. विद्यालयं गच्छन्ति ।

प्र. 17 कोष्ठकेभ्यः उचितपदैः रिक्तस्थानानि पूरयत – (1×5=5)

क) ............. सर्वतः अट्टालिकाः सन्ति । (नगरस्य / नगरम्)

ख) पुत्र ............. सह आपणं गच्छति । (पित्रा / पितृ)

ग) ............. परितः वृक्षाः सन्ति । (विद्यालयात् / विद्यालयम्)

घ) ............. बालिकाः मधुराणि गीतानि गायन्ति । (एताः / एतस्मै)

ङ) अध्ययने ............. बालः अद्वितीयः अस्ति । (एतेन / एषः)